# सुन्दरकाण्ड षड्विंशः सर्गः (२६) - ॥ प्राण त्याग निश्चयः॥

प्रसक्ताश्रु मुखीत्येवं ब्रुवन्ती जनकात्मजा ।
अधोमुख मुखी बाला विलप्तु मुपचक्रमे ॥ १ ॥

उन्मत्तेव प्रमत्तेव भ्रान्त चित्तेव शोचती ।
उपावृत्ता किशोरीव विवेष्टन्ती महीतले ॥ २ ॥

राघवस्य प्रमत्तस्य रक्षसा कामरूपिणा ।
रावणेन प्रमथ्याह मानीता क्रोशती बलात् ॥ ३ ॥

राक्षसी वश मापन्ना भर्त्स्यमाना सुदारुणम् ।
चिन्तयन्ती सुदुःखार्ता नाहं जीवितु मुत्सहे ॥ ४ ॥

न हि मे जीवितै रर्थो नैवार्थैर् नच भूषणैः ।
वसन्त्या राक्षसी मध्ये विना रामं महारथम् ॥ ५ ॥

अश्म सारमिदं नून मथवाऽप्य जरामरम् ।
हृदयं मम येनेदं न दुःखे नावशीर्यते ॥ ६ ॥

धिङ्गा मनार्या मसतीं याऽहं तेन विना कृता ।
मुहूर्तमपि रक्षामि जीवितं पाप जीविता ॥ ७ ॥

चरणेनापि सव्येन न स्पृशेयं निशाचरम् ।
रावणं किं पुनरहं कामयेयं विगर्हितम् ॥ ८ ॥

प्रत्याख्यातं न जानाति नात्मानं नात्मनः कुलम् ।
यो नृशंस स्वभावेन मां प्रार्थयितु मिच्छति ॥ ९ ॥

छिन्ना भिन्ना विभक्ता वा दीप्ते वाग्नौ प्रदीपिता ।
रावणं नोप तिष्ठेयं किं प्रलापेन वश्चिरम् ॥ १० ॥

ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः ।
सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्य सङ्क्षयात् ॥११॥

राक्षसानां जनस्थाने सहस्राणि चतुर्दश ।
येनैकेन निरस्तानि स मां किं नाभिपद्यते ॥ १२ ॥

निरुद्धा रावणेनाह मल्प वीर्येण रक्षसा ।
समर्थः खलु मे भर्ता रावणं हन्तु माहवे ॥ १३ ॥

विराधो दण्डकारण्ये येन राक्षस पुङ्गवः ।
रणे रामेण निहतः स मां किं नाभि पद्यते ॥ १४ ॥

कामं मध्ये समुद्रस्य लङ्केयं दुष्प्रधर्षणा ।
न तु राघव बाणानां गतिरो धीह विद्यते ॥ १७ ॥

किन्तु तत्कारणं येन रामो दृढ पराक्रमः ।
रक्षसा पहृतां भार्या मिष्टां नाभ्यवपद्यते ॥ १६ ॥

इहस्थां मां न जानीते शङ्के लक्ष्मण पूर्वजः ।
जानन्नपि हि तेजस्वी धर्षणं मर्षयिष्यति ॥ १५ ॥

हृतेति योऽधि गत्वा मां राघवाय निवेदयेत् ।
गृध्र राजोऽपि स रणे रावणेन निपातितः ॥ १८ ॥

कृतं कर्म महत्तेन मां तथाभ्यव पद्यता ।
तिष्ठता रावण द्वन्द्वे वृद्धेनापि जटायुषा ॥ १९ ॥

यदि मामिह जानीयाद् वर्तमानां स राघवः ।
अद्य बाणैरभिक्रुद्धः कुर्याल् लोक मराक्षसम् ॥ २० ॥

विधमेच्च पुरीं लङ्कां शोषयेच्च महोदधिम् ।
रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥ २१ ॥

ततो निहत नाथानां राक्षसीनां गृहे गृहे ।
यथाह मेवं रुदती तथा भुयो न संशयः ॥ २२ ॥

अन्विष्य रक्षसां लङ्कां कुर्याद् रामः सलक्ष्मणः ।
न हि ताभ्यां रिपु र्दृष्टो मुहूर्त मपि जीवति ॥ २३ ॥

चिता धूमा कुलपथा गृध्र मण्डल सङ्कुला ।
अचिरेण तु लङ्केयं श्मशान सदृशी भवेत् ॥ २४ ॥

अचिरेणैव कालेन प्राप्स्याम् येव मनोरथम् ।
दुष्प्रस्थानोऽय माख्याति सर्वेषां वो विपर्ययम् ॥ २५ ॥

यादृशानीह दृशन्ते लङ्काया मशुभानि वै ।
अचिरेण तु कालेन भविष्यति हतप्रभा ॥ २६ ॥

नूनं लङ्का हते पापे रावणे राक्षसाधमे ।
शोषं यास्यति दुर्धर्षा प्रमदा विधवा यथा ॥ २७॥

पुण्योत्सव समुत्था च नष्टभर्त्री स राक्षसी ।
भविष्यति पुरी लङ्का नष्ट भर्त्री यथाङ्गना ॥ २८ ॥

नूनं राक्षस कन्यानां रुदन्तीनां गृहे गृहे ।
श्रोष्यामि नचिरादेव दुःखार्ताना मिह ध्वनिम् ॥ २९ ॥

सान्धकारा हतद्योता हत राक्षस पुङ्गवा ।
भविष्यति पुरी लङ्का निर्दग्धा राम सायकैः ॥ ३० ॥

यदि नाम स शूरो मां रामो रक्तान्त लोचनः ।
जानीयाद् वर्तमानां हि रावणस्य निवेशने ॥ ३१ ॥

अनेन तु नृशंसेन रावणे नाधमेन मे ।
समयो यस्तु निर्दिष्टस् तस्य कालोऽयमागतः ॥ ३२ ॥

अकार्यं ये न जानन्ति नैर्ऋताः पाप कारिणः ।
अधर्मात्तु महोत्पातो भविष्यति हि साम्प्रतम् ॥ ३३ ॥

नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः ।
ध्रुवं मां प्रातराशार्थे राक्षसः कल्पयिष्यति ॥ ३४ ॥

साहं कथं करिष्यामि तं विना प्रिय दर्शनम् ।
रामं रक्तान्त नयन मपश्यन्ती सुदुःखिता ॥ ३५ ॥

यदि कश्चित् प्रदाता मे विषस्याद्य भवेदिह ।
क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ॥ ३६ ॥

नाजानाज् जीवतीं रामः स मां लक्ष्मण पूर्वजः ।
जानन्तौ तौ न कुर्यातां नोर्व्यां हि मम मार्गणम् ॥ ३७ ॥

नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः ।
देवलोक मितो यातस् त्यक्त्वा देहं महीतले ॥ ३८ ॥

धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
मम पश्यन्ति ये नाथं रामं राजीव लोचनम् ॥ ३९ ॥

अथवा न हि तस्यार्थो धर्मकामस्य धीमतः ।
मया रामस्य राजर्षेर् भार्यया परमात्मनः ॥ ४० ॥

दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्य पश्यतः ।
नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥ ४१ ॥

किं नु मे न गुणाः केचित् किं वा भाग्यक्षयो मम ।
याहं सीदामि रामेण हीना मुख्येन भामिनी ॥ ४२ ॥

श्रेयो मे जीवितान् मर्तुं विहीनाया महात्मनः ।
रामा दक्लिष्ट चारित्राच् छूराच् छत्रु निबर्हणात् ॥ ४३ ॥

अथवा न्यस्त शस्त्रौ तौ वने मूलफलाशिनौ ।
भ्रातरौ हि नरश्रेष्ठौ संवृत्तौ वनगोचरौ ॥ ४४ ॥

अथवा राक्षसेन्द्रेण रावणेन दुरात्मना ।
छद्मना सादितौ शूरौ भ्रातरौ राम लक्ष्मणौ ॥ ४५ ॥

साऽहमेवं गते काले मर्तुमिच्छामि सर्वथा ।
न च मे विहितो मृत्यु रस्मिन् दुःखेऽपि वर्तति ॥ ४६ ॥

धन्याः खलु महात्मानो मुनयस् त्यक्त किल्बिषाः ।
जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये ॥ ४७ ॥

प्रियान्न सम्भवेद् दुःख मप्रिया दधिकं भयम् ।
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥ ४८ ॥

साहं त्यक्ता प्रियार्हेण रामेण विदितात्मना ।
प्राणांस् त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥